# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा** - आचार्य-२ ( **Sem_4** )    **प्रश्नपत्र-४**    **गुणाः - ७०**

**विषयः - पुराणेतिहासः**    CC 5.4.12    **समयः - ११:०० तः ०२:००**

**दिनाङ्कः** - 21/04/2016    **सन्दर्भग्रन्थः - अग्निपुराणम् – १६८-२०० अध्यायाः गरुडपुराणस्य प्रेतकल्पश्च ।**

---

### युनिट-१

**प्रश्न-१    कस्याप्येकस्य ससन्दर्भं व्याख्या कार्या ।    ०४**

१. दण्डं कुर्यान्नृपो नृणां प्रायश्चित्तमकुर्वताम् । कामतोऽकामतो वाऽपि प्रायश्चित्तं कृतं चरेत् ॥

२. उपपातसंयुक्तो गोघ्नो मासं यवान्पिबेत् । कृतपापो वसेत् गोष्ठे चर्मणा तेन संवृतः ॥

**प्रश्न-२    कस्यापेकस्य सविस्तरम् उत्तरं लिख्यताम् ।    १२**

१. महापातकानां तत्प्रायश्चित्तं वर्णयत ।

२. चतुर्थीपञ्चम्योः व्रतानि विविच्यन्ताम् ।

**प्रश्न-३    चतुर्णां प्रश्नानां लघूत्तराणि ददतु ।    ०४**

१. अग्निपुराणं कतमं पुराणम्?

२. महापातकानि कति सन्ति?

३. ब्रह्महा कति वर्षं वने वसेत्?

४. अग्निपुराणे कति श्लोकाः सन्ति?

५. दीपदानस्य किं फलम्?

### युनिट-२

**प्रश्न-४    कस्यापेकस्य ससन्दर्भं व्याख्या कार्या ।    ०४**

१. एकादश्यां न भुञ्जीत पक्षयोरूभयोरपि । द्वादश्येकादशी यत्र तत्र संनिहितो हरिः ॥

२. कामयुक्ता तु सोपाष्या कुर्वञ्जागरणं व्रती । शिवरात्रिव्रतं कुर्वे चतुर्दश्यामभोजनम् ॥

**प्रश्न-५    कस्याप्येकस्योत्तरं सविस्तरं लिखत ।    ०८**

१. आश्विनशुक्लनवम्याः व्रतं समीक्षत ।

२. एकादश्यां कर्तव्याकर्तव्यानि दर्शयत ।

**प्रश्न-६    त्रायाणाम् एकेन वाक्येन उत्तरं दत्त ।    ०३**

१. शस्त्रपूजा कदा कार्या?

२. निराहारः कदा भाव्यः?

३. दीपदानं कीदृक् प्रोक्तम्?

४. स्थाणुः अर्थात् को देवः?

५. द्वादशाक्षरमन्त्रः कः?

## युनिट-३

**प्रश्न-७ ससन्दर्भ कस्याप्येकस्य व्याख्या कार्या । ०४**

१. षडशीतिसहस्राणि योजनानां प्रमाणतः । यमलोकस्य चोर्ध्वं वै अन्तरामानुषस्य च ॥

२. शीघ्रं प्रचल दुष्टात्मन् गतोऽसि त्वं यमालयम् । कुम्भीपाकादिनरकास्त्वां नेष्यामश्च मा चिरम् ॥

**प्रश्न-८ कस्यापेकस्य सारः देयः । ०८**

१. गरुडपुराणोक्तसदाचाराः ।

२. गरुडरपुराणे प्रेतकल्पः ।

**प्रश्न-९ त्रयाणाम् एकवाक्येन उत्तरं यच्छत । ०३**

१. विहगेन्द्रः अर्थात् कः?

२. श्राद्धशब्दस्य का व्युत्पत्तिः?

३. प्रेतकल्पे कति अध्यायाः सन्ति?

४. श्राद्धं कतिविधं स्मृतम्?

५. पार्वणं श्राद्धम् अर्थात् किम्?

## युनिट-४

**प्रश्न-१० ससन्दर्भ कस्याप्येकस्य व्याख्या कार्या । ०४**

१. देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वधायै स्वाहायै नित्यमेव भवन्तु ते ॥

२. नदीं वैतरणीं तर्तुं दद्याद्वैतरणीं च गाम् । कृष्णस्तनी सकृष्णाङ्गी सा वै वैतरणी स्मृता ॥

**प्रश्न-११ कस्याप्येकस्योत्तरं लिखत । १२**

१. प्रेतकल्पोक्तानि कर्तव्याकर्तव्यानि ।

२. पुराणेषु गरुडपुराणं समीक्षत ।

**प्रश्न-१२ प्रदत्तेभ्यः द्वयोः एकैकवाक्येन उत्तरं दत्त । ०४**

१. तार्क्ष्यः इति शब्दस्य कोऽर्थः?

२. चित्रगुप्तः किं कार्यं कुरुते?

३. अन्तकः अर्थात् कः देवः?

४. गरुडपुराणे कति श्लोकाः सन्ति?

५. गरुडपुरास्य प्रधानो वक्ता कः?